श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधिस्वामि विरचितः

# ॥ श्रीमालोलस्तवः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीमालोलस्तवः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

माया धव! श्रीनृहरे नमस्ते!
 कायाधवार्थं कलितावतार!।
मायापरं मामपि रक्षितुं त्वं
 कायान्तराभाहि तमो विभिन्दन्॥ १॥

मालोलमाहुर्भगवन्! भवन्तं
 सन्तो महान्तो निगमान्तनिष्ठाः।
तथैकलं चाहुरहो! विचित्रं
 मिथो विरोधान्मतिरेति मोहम्॥ २॥

त्वां तत्त्वतो वेत्तुमहं न चालं
 मामेकलं तेन विभावयामि।
मालोललोलं च विभाव्य नाथ!
 दयानिधे! मोहमहं त्यजामि॥ ३॥

हिरण्यवर्णां हरिणीं वहन्तं
 गजं भजन्तं परिपालयन्तम्।
मालोलसिंहं परमाद्भुतं त्वां
 आगस्विनामग्रगतः प्रपद्ये॥ ४॥

हिरण्यमूर्तिं तपनान्तरङ्गं
 हिरण्यशृङ्गं वरुणात्मतायाम्।
हिरण्यवर्णां हरिणीं वहन्तं
 हिरण्यदानं भगवन्तमीडे॥ ५॥

www.prapatti.com

प्रह्लादवन्नतजनं परिपालयन्तं
तत्तातवन्नतजनाघमपोहयन्तम्।
प्रह्लाददं नतजनाय हिरण्यदं च
मालोलमानवमृगेन्द्रमहं प्रपद्ये॥ ६ ॥

स्थूणाधिकानामपि मादृशानाम्
अन्तर्निवासाय स एव योग्याम्।
स्थूणान्तरासाद्य चकार तस्मै
मालोलसिंहाय नमो नमोऽस्तु॥ ७ ॥

हिरण्यवक्षो न रुषा व्यदारीत्
दयानिधिर्वत्सल एष नाथः।
नखैश्चिकित्सां पुनराततान
दोषान् तदन्तर्वहतो निरस्यन्॥ ८ ॥

एवं त्रिरेव प्रभुरस्य कृत्वा
वैद्यश्चिकित्सां शिशुपालतायाम्।
दोषानपोह्य क्षमया ददौ तत्
स्वानन्दमस्मै तममुं प्रपद्ये॥ ९ ॥

मालोलसिंहाय नमो नमस्ते
मालोलमेनं विषयेष्वजस्रम्।
आलोलमाहेति कुटुम्बकार्ये
मालोलमालोकत आतनुष्व॥ १० ॥

मालोलेति त्र्यक्षरी यस्य कण्ठे
मालोला स्यात् सुस्थिरा तस्य गेहे।
माला लोला सत्कलानां च तस्मिन्
बालालापा लालनीयाः कलाश्च॥ ११ ॥

श्रीवासराघवकवीन्द्रपयोधिजातं
मालोलविष्णुपददेवनदर्शनीयम्।

www.prapatti.com

एतं निषेव्य समये स्तवराजचन्द्रं
संसारतापमखिलं शमयन्तु सन्तः॥ १२॥

॥ इति श्रीमालोलस्तवः समाप्तः॥

www.prapatti.com